No. ६७५-घ

Title यजुर्वेदे स्वस्त्ययनम्

Author

Extent २ Age

Subject वेदः सम्पूर्णम्

नं० ६७५-घ

यजुर्वेदे स्वस्त्ययनम् (वेदः)

पत्रे २ (सम्पूर्णम्) पं० २

नं० ५७५-घ

॥श्रीगणेशायनमः॥ हरिःहिः ॐ ॥ स्वस्तिनइंद्रोवृद्धश्रवाः स्वस्तिनः पूषा
विश्ववेदाः॥ स्वस्तिनस्ताक्ष्यो अरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥
या पृषदश्वामरुतः पृश्निमातरः शुभंयावानोविदथेषुजग्मयः॥ अग्निर्जिह्वा
मनवः सूरचक्षसोविश्वेनोदेवा अवसागमन्निह॥ भद्रंकर्णेभिःशृणुया
मदेवाभद्रंपश्येमाक्षभिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम
देवहितंयदायुः॥ शतमिंनुशरदोअंतिदेवायत्रानश्चक्राजरसंतनू
नां॥ पुत्रासोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गंतोः॥
अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः॥ विश्वे
देवाअदितिः पंचजनाअदितिर्जातमदितिर्जनित्वं॥१॥ स्वस्तिनोमी

मीतामश्विनाभगस्वस्तिदेव्यदितिरनर्वणः ॥ स्वस्तिपूषाअसुरो
१ दधातुनः स्वस्तिद्यावापृथिवीसुचेतुना ॥ स्वस्तयेवायुमुपब्रवाम
हेसोमंस्वस्तिभुवनस्ययस्पतिः ॥ बृहस्पतिंसर्वगणंस्वस्तयेस्व
स्तयआदित्यासोभवंतुनः ॥ विश्वेदेवानोअद्यास्वस्तयेवैश्वान
रोवसुरग्निस्वस्तये ॥ देवाअवंत्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वं
हसः ॥ स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति ॥ स्वस्तिनइंद्रश्चाग्निश्च
स्वस्तिनोअदितेकृधि ॥ स्वस्तिपंथामनुचरेमसूर्याचंद्रमसाविव १
वा ॥ पुनर्ददताघ्नताजानतासंगमेमहि ॥ २ ॥ स्वस्तिस्यनंताक्षे

मरिष्टनेमिं महद्भूतं वायसं देवतानां॥ असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नावमिवा रुहेम॥ अंहोमुचमांगिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यं॥ प्रनेयपाणिः शरणं प्रपद्ये स्वस्ति नं बोधेष्वभयं नो अस्तु॥ ३॥ ॥ ५॥ ७॥ ५ ॥ स्वस्त्ययनसमाप्तः॥